International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 17-19
© 2026 IJMH
www.themultijournal.com
Received: 20-06-2026
Accepted: 07-07-2026
Publish : 08-07-2026

**मोनालिसा प्रधानः**
शोधच्छात्री, साहित्यविभागः
राष्ट्रियसंस्कृविश्वविद्यालयः
तिरपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**मोनालिसा प्रधानः**
शोधच्छात्री, साहित्यविभागः
राष्ट्रियसंस्कृविश्वविद्यालयः
तिरपतिः, आन्ध्रप्रदेशः

# श्रीजगन्नाथधर्मधारा

**मोनालिसा प्रधानः**

ब्रह्मपुराणादिषु उत्कलप्रदेशः अतिपवित्रः, तस्य निवासिनश्च सदाचारिणाः धर्मपरायणाश्च इति वर्णितम्। अतः प्राचीनकालादेव प्रदेशेस्मिन् वैदिकधर्मस्य वैदिकदेवताराधनायाश्च प्रचलनमासीत्। अनन्तरं बौद्धधर्मो जैनधर्मश्चाप्यत्र प्रविष्टौ। ऐतिहासिकदृष्ट्या षष्ठ–सप्तमशताब्द्योः ओड्रदेशे माधवोपासनायाः प्रचारे प्रतिष्ठायां च नीलमाधवरूपेण श्रीजगन्नाथस्योपासना प्रवृत्ता इति विश्वासः। पश्चात् बौद्धधर्मस्य प्रभावात् तस्योपासनाविधौ किञ्चित् परिवर्तनम् अभवत्। वज्रयानबौद्धमतस्य विकासकाले श्रीजगन्नाथः "महाबुद्धः" इति नाम्नापि प्रसिद्धः अभवत् इति कथ्यते।

नवमशताब्द्यां जगद्गुरुः आदिशङ्कराचार्यः श्रीक्षेत्रम् आगतः। सः अद्वैतवेदान्तस्य प्रवर्तकः सन्नपि जीवस्य ब्रह्मत्वप्राप्तये चित्तशुद्धिं, वेदविहितधर्मपालनं, पञ्चदेवोपासनां च विशेषतः प्रतिपादितवान्। सः भारतस्य विविधतीर्थानि परिभ्रम्य लुप्तदेवपीठानामुद्धारं कृत्वा बौद्धान् पराजित्य स्मार्तमतानुसारं देवपूजां पुनः प्रतिष्ठापितवान्। श्रीक्षेत्रेऽपि तेन तथैव कृतम्।

यदा शङ्कराचार्यः ओड्रदेशम् आगतवान् तदा ययातिकेशरी नाम राजा आसीत्। तैः तस्य सादरं स्वागतं कृतम्। पश्चात् ययातिकेशरिणा सोनपुरप्रदेशे पातालस्थिताः श्रीजगन्नाथमूर्तयः उद्धृत्य पुरीनगरम् आनीताः। मन्दिरनिर्माणानन्तरं शङ्कराचार्यः तत्र महादेवं, योगमायां, पुरुषोत्तमं, सुदर्शनं च प्रतिष्ठापयितुं राजानम् उपदिष्टवान्। पुनश्च श्रीबलभद्रस्य, श्रीसुभद्रायाश्च विष्णुशिलां नेतुं स्वशिष्यं भारतीनामानं नेपालराज्ञः शङ्करदेवस्य समीपं प्रेषितवान्। नेपालराजा तां शिलाम् आनन्देन प्रदत्तवान्। ततः परं शङ्कराचार्येण चतुर्धामूर्तेः श्रीजगन्नाथस्य स्मार्तमतसम्मता सेवापूजाव्यवस्था प्रवर्तिता। तदनन्तरं शङ्कराचार्यपरम्परायाः नेपालराजवंशस्य च विशेषसेवाधिकारः प्रचलितः। शङ्कराचार्यः बहूनि वर्षाणि मुक्तिमण्डपसभायाः सभापतित्वं कृत्वा विधिनिर्देशं, सेवकयोग्यतापरीक्षणं च अकरोत्।

द्वादशशताब्द्यां विशिष्टाद्वैतवेदान्तस्य प्रवर्तकः रामानुजाचार्योऽपि पुरीम् आगतवान्। तस्मिन् काले चोडगङ्गदेवः ओड्रदेशस्य राजा आसीत्। तस्य प्रभावेण राजा वैष्णवधर्मम् अङ्गीकृत्य श्रीजगन्नाथमन्दिरस्य पुनर्निर्माणं कारितवान् इति इतिहासविदः वदन्ति। रामानुजाचार्यः पाञ्चरात्रागमविधिना सेवापूजां प्रवर्तयितुम् अत्यन्तं प्रयत्नं कृतवान्, किन्तु सफलो नाभवत्।

अनन्तरं गङ्गवंशीयराज्ञां शासनकाले विष्णुस्वामी, निम्बार्काचार्यः, वल्लभाचार्यः, मध्वाचार्यस्य शिष्यः नरहरितीर्थः, गुरु नानकः, कबीरः, तुलसीदासः, मीराबाई इत्यादयः महान्तः सन्तश्च श्रीक्षेत्रम् आगतवन्तः। नरहरितीर्थः कतिपयानि वर्षाणि ओड्रदेशे स्थित्वा राज्यप्रशासनेऽपि साहाय्यमकरोत्। रामानुजसम्प्रदायस्य रामानन्दशाखायाश्च बहवः सन्ताः, संन्यासिनः, आचार्याश्च अत्र आगत्य बहून् मठान् प्रतिष्ठापितवन्तः।

पश्चात् सूर्यवंशीगजपतिप्रतापरुद्रदेवस्य राज्यकाले चैतन्यमहाप्रभुः पुरीम् आगत्य चतुर्विंशतिवर्षाणि तत्र न्यवसत्। सः नित्यं श्रीजगन्नाथदर्शनं कृत्वा प्रेमभक्त्या भावविह्वलः भवति स्म। सः श्रीजगन्नाथं श्रीकृष्णस्य स्वरूपत्वेन अपश्यत्, तस्य पार्षदाश्च तमेव श्रीजगन्नाथस्यावतारम् अमन्यन्त। गजपति-प्रतापरुद्रेण सह तस्य घनिष्ठः सम्बन्धः आसीत्। तस्य प्रभावेण श्रीमन्दिरे सेवापूजायाः व्यवस्था अधिका नियमिताऽभवत् इति मन्यते।

चैतन्यमहाप्रभुः शुद्धप्रेमभक्तेः प्रचारकः आसीत्। नामसंकीर्तनस्य, भजनस्य च माध्यमेन श्रीकृष्णप्रेमप्राप्तिः मानवजीवनस्य परमलक्ष्य-मिति सः प्रतिपादितवान्। परवर्तिकाले रसिकानन्दः, श्यामानन्दः च अन्ये चैतन्यसम्प्रदायीयवैष्णवसन्ताः अत्र आगत्य स्वमठाश्रमान् प्रतिष्ठापितवन्तः।

अस्मिन्नेव काले ओड्रदेशे अन्योऽपि वैष्णवसम्प्रदायः समुत्पन्नः। तस्य प्रवर्तकाः बलरामः, जगन्नाथः, अच्युतानन्दः, यशोवन्तः, अनन्तश्च—एते पञ्चसखाः इति प्रसिद्धाः। तेषां साधनामार्गः ज्ञानमिश्रभक्तिरिति कथ्यते। ते श्रीजगन्नाथमेव षोडशकलासम्पूर्णं परमतत्त्वम् अमन्यन्त। श्रीकृष्णादयः सर्वेऽवताराः श्रीजगन्नाथस्यैव कलाविशेषाः इति तेषां मतम्। पुरुषोत्तमक्षेत्रं नित्यधामः, अन्यानि तीर्थानि तस्मादेव उत्पन्नानि इति ते प्रतिपादितवन्तः। योगबलात् षट्चक्रभेदनपूर्वकं परब्रह्मस्वरूपिणं श्रीजगन्नाथं प्राप्तुं शक्यते इति तेषां विश्वासः। तेषां महामन्त्रः, गायत्री, प्रमाणग्रन्थाश्च गौडीयवैष्णवसम्प्रदायात् भिन्नाः। अतः पञ्चसखाप्रवर्तितः ओड्रवैष्णवधर्मः केषुचित् विषयेषु गौडीय-वैष्णवसम्प्रदायात् पृथक् दृश्यते। तेषां ग्रन्थरचनाभिः ओडिआ-साहित्यं समृद्धम् अभवत्।

एवं श्रीजगन्नाथः विभिन्नकालेषु विभिन्नवैष्णवसम्प्रदायानामारा-ध्यदेवता अभवत्। तथैव शैव-शाक्त-सौर-गाणपत्यादिसम्प्रदाया-नामपि सन्तैः पूजितः वन्दितश्च। सन्ततुलसीदासेन सः श्रीरामरूपेण, गणपतिभट्टेन च गणेशरूपेण दृष्टः इति प्रसिद्धम्। अद्य सर्वेषां सम्प्रदायानां हिन्दुभक्ताः श्रीमन्दिरम् आगत्य श्रीजगन्नाथस्य दर्शनं पूजनं च कुर्वन्ति। किन्तु मन्दिरस्य अन्तःप्रवेशाधिकारः केवलं हिन्दुधर्मावलम्बिनां कृतैव विद्यते।

**श्रीजगन्नाथस्य यात्राः उत्सवाश्च -**

पुराणेषु श्रीजगन्नाथस्य द्वादश-यात्राः प्रसिद्धाः सन्ति। परम्परया तासु यात्रासु अन्येऽपि बहवो उत्सवाः समायोजिताः, येन तेषां संख्या वर्धिता। तेषु केचन प्रमुखोत्सवाः अधोलिखिताः सन्ति।

**१. स्नानयात्रा अथवा देवस्नानपूर्णिमा-**

ज्यैष्ठमासस्य पूर्णिमायां देवस्नानयात्रा भवति। अस्मिन् दिने श्रीजगन्नाथः, श्रीबलभद्रः, श्रीसुभद्रा, श्रीसुदर्शनश्च रत्नसिंहासनात् स्नानमण्डपं नीयन्ते, तत्र तेषां महाभिषेकः क्रियते। स्नानार्थं मन्दिरस्य उत्तरभागस्थितात् सुवर्णकूपात् जलम् आनीयते। अस्य कूपस्य जलम् अन्यस्मिन् काले नोपयुज्यते। स्कन्दपुराणानुसारम् एष एव श्रीजगन्नाथस्य जन्मदिवसः। स्नानोत्तरं श्रीजगन्नाथः श्रीबलभद्रश्च गजवेषं धारयतः। अस्मिन् अवसरे मन्दिरस्य बहिः स्थिताः भक्ताः अपि चतुर्धामूर्तेः दर्शनं कुर्वन्ति।

स्नानयात्रायाः अनन्तरं दारुविग्रहाणां संस्कारः क्रियते। आषाढा-मावास्यायां ते नूतनवर्णैः भूषणैश्च विभूष्यन्ते। एषः नवयौवनदर्शनम् इति प्रसिद्धः। एतेषु पञ्चदशसु दिनेषु भगवत्दर्शनं कर्तुं न शक्यते। अयं कालः अनवसरः (अनसरः) इति कथ्यते। अस्मिन् काले चित्रपटप्रतिमाः धातुप्रतिमाश्च पूज्यन्ते। प्रतिपदि नेत्रोत्सवः विधीयते।

**२. रथयात्रा अथवा श्रीगुण्डिचायात्रा-**

आषाढशुक्लद्वितीयातः त्रयोदशीपर्यन्तं रथयात्रामहोत्सवः भवति। द्वितीयादिने श्रीजगन्नाथः, श्रीबलभद्रः, श्रीसुभद्रा, श्रीसुदर्शनश्च स्व-स्वरथेषु आरुह्य गुण्डिचामन्दिरं प्रति प्रयान्ति। श्रीजगन्नाथस्य रथः नन्दिघोषः, श्रीबलभद्रस्य तालध्वजः, श्रीसुभद्रायाः देवदलनः (दर्पद-लनः) इति प्रसिद्धाः। श्रीसुदर्शनः श्रीसुभद्रायाः रथे प्रतिष्ठाप्यते।

दारुविग्रहाणां रथारोहणस्य विशेषरीतिः पहण्डी इति कथ्यते। अनन्तरं गजपतिमहाराजः सुवर्णदण्डयुक्तया मार्जन्या चन्दनजलैः पुष्पैश्च रथान् परिमार्जयति। एषा छेरापहँरा इति विख्याता। ततः भक्ताः रथान् आकृष्य गुण्डिचामन्दिरं नयन्ति। नवदिनानन्तरं भगवान् पुनः श्रीमन्दिरं प्रत्यागच्छन्ति। एषा बहुडायात्रा इति कथ्यते। प्रत्यागमनानन्तरं सुवर्णवेषः (राजवेषः), अधरपानभोगः, ततः नीलाद्रिविजयः च भवति। लोकपरम्परानुसारं महालक्ष्मी रथयात्रायां न गच्छति। अतः हेरापञ्चमीदिने सा गुण्डिचामन्दिरं गत्वा रथस्य किञ्चिदंशं भङ्क्ति। नीलाद्रिविजये सा श्रीजगन्नाथस्य प्रवेशं निरोद्धुमिच्छति, अन्ते तयोः पुनर्मिलनं भवति। जनश्रु-त्यनुसारं राजा इन्द्रद्युम्नः प्रथमं गुण्डिचागृहे श्रीजगन्नाथं प्रतिष्ठाप्य, पश्चात् महोत्सवेन मुख्यदेवालयं नीतवान्। अतः एषा यात्रा पतितपावनमहोत्सवः, घोषयात्रा, महावेदीमहोत्सवः इत्यादिना-मभिः अपि प्रसिद्धा।

**३. चन्दनयात्रा-**

वैशाखशुक्लतृतीयायाः (अक्षयतृतीयायाः) आरभ्य एकविंशतिदिन-पर्यन्तं चन्दनयात्रा भवति। अस्मिन् काले मदनमोहनः, श्रीदेवी, भूदेवी, पञ्चमहादेवश्च नरेन्द्रपुष्करिण्यां नौकाविहारं कुर्वन्ति। प्रतिदिनं द्विवारं नौकाविहारः, विशेषभोगः, विशेषवेषश्च भवति।

**४. दोलयात्रा-**

फाल्गुनशुक्लदशमीतः पूर्णिमापर्यन्तं दोलोत्सवः भवति। दोलगो-विन्दः, श्रीदेवी, भूदेवी च जगन्नाथवल्लभमठं गच्छन्ति। पूर्णिमायां दोलवेद्यां दोलोत्सवः, फगुक्रीडा, भोगः, बन्दापनं च विधीयते।

**५. श्रीकृष्णजन्मोत्सवः तथा कृष्णबाललीलाः-**

भाद्रपदकृष्णाष्टम्यां श्रीकृष्णजन्मोत्सवः आचर्यते। ततः शुक्ल-दशमीपर्यन्तं श्रीकृष्णस्य विविधाः बाललीलाः श्रीमन्दिरे, जगन्नाथ-वल्लभमठे, नगरे च भव्यतया अभिनीयन्ते।

**६. झूलनयात्रा-**

श्रावणशुक्लदशम्याः आरभ्य सप्तदिनानि झूलनोत्सवः भवति। मुक्तिमण्डपे सुशोभिता दोला निर्मीयते। तस्यां मदनमोहनः श्रीदेवी भूदेवी च दोलायन्ते।

**७. दुर्गापूजा-**

आश्विनकृष्णमूलाष्टमीतः आश्विनशुक्लमहानवमीपर्यन्तं दुर्गापूजा विधीयते। विमलादेव्याः मन्दिरे मुख्यशारदीयपूजा सम्पद्यते। अन्तिमेषु त्रिषु दिनेषु विशेषान्नभोगः समर्प्यन्ते।

**८. श्रीरामजन्मोत्सवः तथा रामलीला-**

चैत्रशुक्लनवम्यां रामनवमीदिने श्रीरामजन्मोत्सवः भवति। ततः रावणवधपर्यन्तं रामायणानुसारं श्रीरामस्य विविधाः लीलाः जगन्नाथवल्लभमठे प्रचलन्ति।

**९. हरिशयनम्, पार्श्वपरिवर्तनम्, उत्थानम्-**

आषाढशुक्लैकादश्यां विष्णोः शयनम्, भाद्रपदशुक्लैकादश्यां पार्श्व-परिवर्तनम्, कार्तिकशुक्लैकादश्यां उत्थानम् आचर्यते। श्रीजगन्नाथ-स्यापि तदनुरूपा नीतिः भवति।

**१०. दक्षिणायनम् उत्तरायणं च-**

कर्कटसंक्रान्तौ दक्षिणायनम्, मकरसंक्रान्तौ उत्तरायणमिति विशेष-पूजा भवति। मकरसंक्रान्तौ मकरचूर्णयुक्तः मकरतण्डुलभोगः निवेद्यन्ते।

एतान् अतिरिच्य घोड़लागि, दमनकोत्सवः, रुक्मिणीविवाहः, नृसिंहजन्मोत्सवः, बलभद्रजन्मोत्सवः(रक्षाबन्धनम्), राधाजन्मो-त्सवः, वामनजन्मोत्सवः, अनन्तव्रतम्, कार्तिकव्रतम्, नीलाद्रिमहो-त्सवः इत्यादयः अनेके उत्सवाः आसंवत्सर श्रद्धया समाराध्यन्ते।

तथैव श्रीमन्दिरस्थितानां पार्श्वदेवादेवीनां विशिष्टपर्वाणि उत्सवाश्च नियतदिनेषु विधीयन्ते।

**परिशिलितग्रन्थसुची-**


1. संस्कृत साहित्य का इतिहास – वलदेव उपाध्याय।
2. शारदापीठ प्रदीप , द्वारिका संस्कृत अकादमी – 2017
3. श्रीजगन्नाथ संस्कृतिः – रा.सं.विश्वविद्यालयः, तिरुपति – 2025
4. स्कन्दपुराणम् – पुरुषोत्तमक्षेत्रमाहात्म्यम्।
5. ब्रह्मपुराणम् – पुरुषोत्तमक्षेत्र एवं श्रीजगन्नाथमहिमा।
6. पद्मपुराणम् – उत्कलखण्डः।
7. नीलाद्रिमहोदयः – श्रीजगन्नाथमन्दिरस्य उत्पत्तिः, सेवापद्धतिः, धर्मपरम्परा।
8. कपिलसंहिता – उत्कलधर्मः तथा पुरुषोत्तमक्षेत्रम्।